एतेन गतियोगेन यदा काष्ठान्तु दक्षिणाम्।
पर्य्यागच्छत् पतङ्गोऽसौ वामकोष्ठेऽन्तरेऽहनि ॥
मध्येन पुष्करस्याथ भ्रमते दक्षिणायने।
मानसोत्तरमेरोस्तु अन्तरं त्रिगुणन्तु तत् ॥*॥
सर्पतो दक्षिणायान्तु काष्ठायान्तु निबोधत।
नवकोट्यः प्रसंख्याता योजनैः परिमण्डलम् ॥
तथा शतसहस्राणि चत्वारिंशच्च पञ्च च।
अहोरात्रा पतङ्गस्य गतिरेषा विधीयते ॥
दक्षिणाद्विनिवृत्तोऽसौ विषुवस्थो यदा रविः।
क्षीरोदस्य समुद्रस्य उत्तरातो दिशश्चरन्।
मण्डलं विषुवच्चापि योजनैस्तन्निबोधत ॥
तिस्रः कोट्यस्तु संपूर्णं विषुवस्याथ मण्डलम्।
तथा शतसहस्राणां विंशत्येकाधिका पुनः ॥*॥
श्रावणे चोत्तरां काष्ठां चित्रभानुर्यदा भवेत्।
गोमेदकस्य द्वीपस्य उत्तरास्तु दिशश्चरन् ॥
उत्तरायाः प्रमाणन्तु काष्ठाया मण्डलस्य तु।
दक्षिणोत्तरमध्यानि तानि विद्याद् यथाक्रमम् ॥
स्थानं जरद्गवं मध्ये तथैरावतमुत्तमम्।
वैश्वानरं दक्षिणतो निर्द्दिष्टमिह तत्त्वतः ॥
नागवीथ्युत्तरा वीथी अजवीथ्याश्च दक्षिणे।
उभे आषाढ़मूलन्तु अजवीथ्युदयास्त्रयः ॥
अभिजित् पूर्व्वतः स्वातौ नागवीथ्युत्तरास्त्रयः।
अश्विनी कृत्तिका याम्या नागवीथ्युत्तरा स्मृता ॥
रोहिण्यार्द्रा मृगशिरो नागवीथीरिति स्मृता।
पुष्याश्लेषा पुनर्व्वस्वोर्वीथीरैरावती स्मृता ॥
तिस्रस्तु वीथयो ह्येता उत्तरो मार्ग उच्यते।
पूर्व्वा उत्तरफल्गुन्योर्मघा चैवार्षभी भवेत् ॥
पूर्व्वोत्तरे प्रोष्ठपदे गोवीथी रेवती स्मृता।
श्रवणा तु धनिष्ठा च वारुणञ्च जरद्गवम्।
एताश्च वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥
हस्ता चित्रा तथा स्वाती नागवीथीरिति स्मृता।
विशाखमित्रपैत्र्यश्च नागवीथीरिहोच्यते ॥
मूलपूर्व्वोत्तराषाढ़ा विथीव्वैश्वानरी तथा।
स्मृतास्तिस्रस्तु वीथ्यस्ता मार्गे वै दक्षिणे बुधैः ॥
काष्ठयोरन्तरं त्वेता वक्ष्यन्ते योजनैः पुनः।
एतच्छतसहस्राणामेकत्रिंशत्तु वै स्मृतम् ॥
शतानि त्रीणि चान्यानि त्रयस्त्रिंशच्च योजनैः
काष्ठयोरन्तरं ह्येवं योजनाग्रात् प्रकीर्त्तितम् ॥
काष्ठयोर्लेखयोश्चैव अयने दक्षिणोत्तरे।
ते वक्ष्यामि प्रसंख्याय योजनैस्तु निबोधत ॥
एकैकमन्तरन्तद्वै युक्तान्येतानि सप्ततिः।
सहस्रै रतिरिक्ता च ततोऽन्या पञ्चविंशतिः ॥
लेखयोः काष्ठयोश्चैव वाह्याभ्यन्तरयोश्चरन्।
अभ्यन्तरं स पर्य्येति मण्डलान्युत्तरायणम् ॥
वाह्यतो दक्षिणेनैव सततं सूर्य्यमण्डलम्।
चरत्यसौ प्रतीचान्तु त्रयशीतिमण्डलं शतम् ॥
तरणिर्द्दक्षिणे तावत् क्रमते मण्डलानि तु।
प्रमाणं मण्डलस्यापि योजनाग्रान्निबोधत ॥
योजनानां सहस्राणि दश चाष्टौ ततः स्मृतः।
अधिकान्यष्टपञ्चाशत् योजनानि च वै पुनः ॥
विष्कम्भो मण्डलस्यैतत्तिर्य्यक् स तु विधीयते।
अहस्तु चरते नाभिं सूर्य्यो वै मण्डलक्रमात् ॥
कुलालचक्रपर्य्यन्तं यथा रविः शशी तथा।
दक्षिणे चक्रवत् सूर्य्यस्तथा शीघ्रं निवर्त्तते ॥
तस्मात् प्रकृष्टां भूमिन्तु कालेनाल्पेन गच्छति।
सूर्य्यो द्वादशभिः शीघ्रं मुहूर्त्तैर्द्दक्षिणायने ॥
त्रयोदशार्द्धमृक्षाणां मध्ये चान्तरमण्डलम्।
मुहूर्त्तैस्तानि ऋक्षाणि नक्तमष्टादशैश्चरन् ॥
कुलालचक्रमध्यस्थो यथामन्दं प्रसर्पति।
उदगयने तथा सूर्य्यः स सर्पेत् मन्दविक्रमः ॥
तस्मात् दीर्घेण कालेन भूमिं सोऽल्पां प्रसर्पति
सूर्य्योऽष्टादशभिर्वह्नो मुहूर्त्तैरुदगायने ॥
त्रयोदशानां मध्ये तु ऋक्षाणां चरते रविः।
मुहूर्त्तैस्तानि ऋक्षाणि रात्रौ द्वादशभिश्चिरम् ॥
ततो मन्दतरं ताभ्यां चक्रन्तु भ्रमतां पुनः।
मृत्पिण्ड इव मध्यस्थो भ्रमतेऽसौ ध्रुवस्तथा ॥
मुहूर्त्तैस्तावत् त्रिंशद्भिरहोरात्रं ध्रुवं भ्रमन्।
उभयोः काष्ठयोर्म्मध्ये भ्रमते मण्डलानि तु ॥
उत्तरे प्रक्रमेऽर्कस्य दिवा मन्दगतिः स्मृता।
तस्यैव तु पुनर्नक्तं शीघ्रा सूर्य्यस्य वै गतिः ॥
दक्षिणे क्रमणे चापि दिवा शीघ्रं विधीयते।
गतिः सूर्य्यस्य वै नक्तं मन्दा चापि पुनः स्मृता ॥
एवं गतिविशेषेण विभजेद्रात्र्यहानि तु।
अजवीथ्या दक्षिणं यश्चोकालोकस्य चोत्तरम् ॥
लोकसन्तानको ह्येष वैश्वानरपथाद्वहिः।
व्युष्टा यावत् प्रभा सौरी पुष्करात् संप्रकाशते।
पार्श्वेभ्यो वाह्यतस्तावत् लोकालोकस्तु पर्व्वतः ॥
योजनानां सहस्राणि दशोर्द्धं चोच्छ्रितो गिरिः।
प्रकाशश्चाप्रकाशश्च सर्व्वतः परिमण्डलः ॥
नक्षत्रचन्द्रसूर्य्याश्च ग्रहास्तारागणैः सह।
अभ्यन्तरे प्रकाशन्ते लोकालोकस्य वै गिरेः ॥
इति मात्स्ये १०१ अध्यायः ॥
अस्य राहुग्रस्तादिकारणं यथा,—

नन्द उवाच।

"राहुग्रस्तः कथं सूर्य्यश्चन्द्रो वापि जगत्प्रभो ॥
नष्टचन्द्रः कथं भाद्रे चतुर्थ्याञ्च सितासिते।
वेदानां जनकस्त्वञ्च कं पृच्छामि त्वया विना ॥

श्रीभगवान् उवाच।

शृणु नन्द प्रवक्ष्यामि कथामेतां पुरातनीम्।
यां श्रुत्वा निष्कलङ्कश्च तीर्थस्नायी भवेन्नरः ॥
एकदा यमदग्निश्च महाकौतूहलान्वितः।
रेणुकासहितस्तुष्टो जगाम नर्म्मदातटम्।
निर्ज्जने नर्म्मदातीरे विजहार तया सह ॥
चन्दनोक्षितसर्व्वाङ्गं वस्त्रमाल्यधरं मुनिम्।
महारासरसाव्यं तमुवाच भास्करः स्वयम् ॥
वेदकर्त्तुः प्रपौत्रस्त्वं ब्रह्मणश्च जगत्पतेः।
चतुर्व्वेदविधेयेषु सुनिष्णातः सदा शुचिः ॥
वेदप्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः।
धर्म्मं त्यजति धर्म्मज्ञो अधर्म्मेण रतः कथम् ॥
दिवामैथुनदोषञ्च वक्ति वेदो विशेषतः।
अहञ्च कर्म्मणां साक्षी तेन त्वां कथयामि ते ॥
सूर्य्यस्य वचनं श्रुत्वा तत्याज मैथुनं द्विजः।
दृष्ट्वा पुरो विप्ररूपं सूर्य्यं तेजस्विनं सुरम्।
उवाच सूर्य्यं रक्तास्यः कोपलज्जासमन्वितः ॥
रेणुका लज्जिता तत्र विधाय वाससी सती ॥

यमदग्निरुवाच।

अद्य मे निर्ज्जनस्थाने रसभङ्गस्त्वया कृतः।
मम शापात् पापदृश्यो राहुग्रस्तो भविष्यति ॥
द्रष्टुं त्वां मेघगणाः सर्व्वे दूरीभूता भवन्ति ते।
त्वामाच्छन्नं करिष्यन्ति वायुना प्रेरितास्तथा ॥
स्वतेजसा भवान् गर्व्वी हततेजा भविष्यति।
मेघाच्छन्नः स्वल्पतेजा राहुग्रस्तो भवान् भव ॥
ब्राह्मणस्य वचः श्रुत्वा भगवान् भास्करः स्वयम्
त्रस्तः पुटाञ्जलिर्भूत्वा तुष्टाव मुनिपुङ्गवम् ॥

सूर्य्य उवाच।

अहमेव त्वया शप्तो मया शप्तो भवान् भव।
अन्यथा मां वदन्त्येवं सूर्य्यं निस्तेजसं जनाः ॥
पराभूतः क्षत्त्रियेण भविष्यसि द्विजेश्वरः।
मरणं क्षत्त्रियास्त्रेण भवतश्च भविष्यति ॥
सूर्य्यस्य वचनं श्रुत्वा चुकोप ब्राह्मणः पुनः।
तं शशापातिरक्तास्यः शम्भुना च जितो भवान् ॥
उभयोः कलहं ज्ञात्वा कश्यपेन सह व्रज।
आजगाम स्वयं ब्रह्मा विधाता जगतामपि ॥
आगत्य ब्रह्मा संत्रस्तं बोधयामास भास्करम्।
मुनिश्रेष्ठञ्च धर्म्मज्ञं धर्म्मज्ञानां गुरोर्गुरुः ॥

ब्रह्मोवाच।

क्षमस्व भास्कर त्वञ्च साक्षान्नारायणो भवान्।
युष्माकं परिपाल्यश्चाप्यवध्यो ब्राह्मणः सदा ॥
अहं करोमि भवतो विप्रशापान्तमुत्तमम्।
शान्तो भव सुरश्रेष्ठ साक्षी त्वं सर्व्वकर्म्मणाम् ॥
कुत्रचिद्दिवसे ब्रह्मन् ऋतौ त्वं कुत्रचित् क्षणम्।
भविष्यसि घनाच्छन्नः सद्यो मुक्तो भविष्यसि ॥
न्यूनातिरिक्ते वर्षे वा राहुग्रस्तो भविष्यसि।
तत्रादृश्यश्च केषाञ्चित् पुण्यदृश्यो हि कस्यचित् ॥
अन्यथा सर्व्वकाले नापुण्यदृश्यो भवान् भुवि।
त्वां दृष्ट्वा च नमस्कृत्य सर्व्वे निष्पापिणो जनाः ॥
जन्मसप्ताष्टरिप्फाङ्कचतुर्थे दशमे विधौ।
जन्मर्क्षे निधने नृणां अदृश्यस्त्वं भविष्यसि ॥
अस्तकाले घनाच्छन्ने मध्याह्नस्थे जलेऽपि वा
अर्द्धोदिते च काले च पापदृश्यो भविष्यसि ॥
भार्य्यादुःखनिमित्तेन भार्य्यया हेतुभूतया।
श्वशुरेण श्यालकेन हततेजा भविष्यसि ॥
अन्यथा तव तेजश्च संज्ञा सहितुमक्षमा।
मालिसुमालियुद्धे च शम्भुना त्वं पराजितः ॥
इत्येवमुक्त्वा सूर्य्यञ्च बोधयामास ब्राह्मणम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।७८।१-५०॥
ब्रह्माण्डपुराणे ५८ अध्यायेऽप्येवमेव ॥

अथ सूर्य्यमन्त्राः।

"तारो घृणिर्भृगुः पश्चादवामकर्णविभूषितः।
वक्रासनो मरुत् शेषः सनेत्रोऽदिस्वपश्चिमः।
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥"
ॐ घृणि सूर्य्य आदित्य। अस्य पूजा। प्रातः
कृत्यादिप्राणायामान्तं विधाय पीठन्यासं कुर्य्यात्
तत्र विशेषः। हृदयस्य पूर्व्वादिदिक्षु मध्ये च।